# Pratahsmarana Ashtakam

# પ્રાતઃસ્મરણાષ્ટકમ્

## Document Information


Text title : Pratahsmarana Ashtakam

File name : prAtaHsmaraNAShTakam.itx

Category : vishhnu, svAminArAyaNa, krishna, suprabhAta, aShTaka

Location : doc_vishhnu

Author : girijAshankarashAstrI

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


August 9, 2024

*sanskritdocuments.org*

# પ્રાતઃસ્મરણાષ્ટકમ્

(વસન્તતિલકા વૃત્તમ્)
પ્રાતઃ સ્મરામિ વૃષપુત્ર-પદારવિન્દં
પાપૌઘ-પાપિજનપાતક-પુઞ્જદાહમ્ ।
મુક્તૈર્મહામુનિગણૈર્મહનીયમાદ્યં
સત્સઙ્ગિનાં પરમમઙ્ગલમાર્તિનાશમ્ ॥ ૧॥

પ્રાતઃ સ્મરામિ સુખશાન્તિનિદાનહેતું
કલ્યાણકારિ-ગુણસાગર-દિવ્યરૂપમ્ ।
સ્વાનેક-જન્મસુકૃતૈ-રવલોકનીયં
શ્રીધર્મપુત્ર-પદમાત્મનિ સન્દધામિ ॥ ૨॥

પ્રાતર્ભજામિ ભજનીય-ભવાબ્ધિસેતું
સંસારિણાં સકલવિઘ્ન-વિનાશદક્ષમ્ ।
વેદાન્તવેદ્ય-શુભષોડશ-ચિન્હલક્ષ્યં
ધ્યાયામિ ધર્મતનયાઙ્ઘ્રિયુગં ધિયાહમ્ ॥ ૩॥

પ્રાતર્ભજામિ ભવભીતિહરં વરેણ્યં
ધ્યાનાસનાદિ-નિયમૈશ્ચ વિના સમાધિમ્ ।
પાપાત્મનાં સુકૃતિના-મપિકારયન્તં
તં નૌમિ ધર્મતનયં શિરસા પ્રણમ્ય ॥ ૪॥

પ્રાતર્નમામિ શિરસા નિગમૈક-ગમ્યં
બ્રહ્મેન્દ્રશર્વ-વિબુધાદિભિરપ્યગમ્યમ્ ।
ઉત્પત્તિ-સંસ્થિતિલયાદિ-નિદાનમેકં
સઞ્ચિન્તયામિ સતતં હરિકૃષ્ણદેવમ્ ॥ ૫॥

પ્રાતર્નમામ્યમિત-દુષ્ટનિબર્હણાય
સદ્ધર્મમર્મ-પરિપાલન-કારણાય ।
બ્રાહ્મણ્ય-વેદપથ-ગોસદનુગ્રહાય

પ્રાદુર્બભૂવ ભુવિ ભક્તિવૃષાઙ્ગતોઽસૌ ॥ ૬॥

પ્રાતર્નમામિ નમનીય-નિજૈકધામ્નો
દુર્વાસસા વિહિતશાપ-નિદાનમેત્ય ।
ઘોરે કલૌ વિષયિ પામર-જીવજાતં
મુક્તૈઃ સમં સમકરોદવતીર્ય યસ્તમ્ ॥ ૭॥

પ્રાતર્નમન્તિ પુલકાઙ્કિત-સર્વગાત્રાઃ
પ્રેમ્ણા સદૈકમનસા-ચલચેતસા યે ।
ધ્યાત્વા સ્વકીયહૃદયે હરિકૃષ્ણમૂર્તિં
તે યાન્તિ ધામ વિશદં ક્ષરભાવશૂન્યમ્ ॥ ૮॥

પ્રાતર્વિહાય શયનં સ્થિરચેતસા યઃ
શ્લોકાષ્ટકં પઠતિ નિત્યમનન્યભક્ત્યા ।
સ્તોત્રં સ્વમઙ્ગલકરં ગિરિજાશિવોક્તં
પુણ્યાહમેતિ નિખિલં નહિ તસ્ય વિઘ્નઃ ॥ ૯॥

ઇતિ શ્રીગિરિજાશઙ્કરશાસ્ત્રીવિરચિતં પ્રાતઃસ્મરણાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Pratahsmarana Ashtakam*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*